श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ सप्तचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ सप्तचत्वारिंशः सर्गः ॥

रावणेरक्षस्य पराक्रमो वधश्च

सेनापतीन् पञ्च स तु प्रमापितान्
    हनूमता सानुचरान् सवाहनान्।
निशम्य राजा समरोद्धतोन्मुखं
    कुमारमक्षं प्रसमैक्षताग्रतः॥ **5.47.1** ॥

स तस्य दृष्ट्यर्पणसम्प्रचोदितः
    प्रतापवान् काञ्चनचित्रकार्मुकः।
समुत्पपाताथ सदस्युदीरितो
    द्विजातिमुख्यैर्हविषेव पावकः॥ **5.47.2** ॥

ततो महान् बालदिवाकरप्रभं
    प्रतप्तजाम्बूनदजालसन्ततम्।
रथं समास्थाय ययौ स वीर्यवान्
    महाहरिं तं प्रति नैर्ऋतर्षभः॥ **5.47.3** ॥

ततस्तपःसङ्ग्रहसञ्चयार्जितं
    प्रतप्तजाम्बूनदजालचित्रितम्।
पताकिनं रत्नविभूषितध्वजं
    मनोजवाष्टाश्ववरैः सुयोजितम्॥ **5.47.4** ॥

सुरासुराधृष्यमसङ्गचारिणं
    तडित्प्रभं व्योमचरं समाहितम्।

सतूणमष्टासिनिबद्धबन्धुरं
यथाक्रमावेशितशक्तितोमरम्॥ **5.47.5** ॥

विराजमानं प्रतिपूर्णवस्तुना
सहेमदाम्ना शशिसूर्यवर्चसा।
दिवाकराभं रथमास्थितस्ततः
स निर्जगामामरतुल्यविक्रमः॥ **5.47.6** ॥

स पूरयन् खं च महीं च साचलां
तुरङ्गमातङ्गमहारथस्वनैः।
बलैः समेतैः सह तोरणस्थितं
समर्थमासीनमुपागमत् कपिम्॥ **5.47.7** ॥

स तं समासाद्य हरिं हरीक्षणो
युगान्तकालाग्निमिव प्रजाक्षये।
अवस्थितं विस्मितजातसम्भ्रमं
समैक्षताक्षो बहुमानचक्षुषा॥ **5.47.8** ॥

स तस्य वेगं च कपेर्महात्मनः
पराक्रमं चारिषु रावणात्मजः।
विचारयन् स्वं च बलं महाबलो
युगक्षये सूर्य इवाभिवर्धत॥ **5.47.9** ॥

स जातमन्युः प्रसमीक्ष्य विक्रमं
स्थितः स्थिरः संयति दुर्निवारणम्।
समाहितात्मा हनुमन्तमाहवे
प्रचोदयामास शितैः शरैस्त्रिभिः॥ **5.47.10** ॥

ततः कपिं तं प्रसमीक्ष्य गर्वितं
जितश्रमं शत्रुपराजयोचितम्।
अवैक्षताक्षः समुदीर्णमानसं
सबाणपाणिः प्रगृहीतकार्मुकः॥ **5.47.11** ॥

स हेमनिष्काङ्गदचारुकुण्डलः
समाससादाशुपराक्रमः कपिम्।
तयोर्बभूवाप्रतिमः समागमः
सुरासुराणामपि सम्भ्रमप्रदः॥ **5.47.12** ॥

रराास भूमिर्न तताप भानुमान्
ववौ न वायुः प्रचचाल चाचलः।
कपेः कुमारस्य च वीर्यसंयुगं
ननाद च द्यौरुदधिश्च चुक्षुभे॥ **5.47.13** ॥

स तस्य वीरः सुमुखान् पतत्रिणः
सुवर्णपुङ्खान् सविषानिवोरगान्।
समाधिसंयोगविमोक्षतत्त्ववि -
च्छरानथ त्रीन् कपिमूर्ध्न्यताडयत्॥ **5.47.14** ॥

स तैः शरैर्मूर्ध्नि समं निपातितैः
क्षरन्नसृग्दिग्धविवृत्तलोचनः।
नवोदितादित्यनिभः शरांशुमान्
व्यराजतादित्य इवांशुमालिकः॥ **5.47.15** ॥

ततः प्लवङ्गाधिपमन्त्रिसत्तमः
समीक्ष्य तं राजवरात्मजं रणे।
उदग्रचित्रायुधचित्रकार्मुकं
जहर्ष चापूर्यत चाहवोन्मुखः॥ **5.47.16** ॥

स मन्दराग्रस्थ इवांशुमालिको
    विवृद्धकोपो बलवीर्यसंवृतः।
कुमारमक्षं सबलं सवाहनं
    ददाह नेत्राग्निमरीचिभिस्तदा॥ **5.47.17** ॥

ततः स बाणासनशक्रकार्मुकः
    शरप्रवर्षो युधि राक्षसाम्बुदः।
शरान् मुमोचाशु हरीश्वराचले
    बलाहको वृष्टिमिवाचलोत्तमे॥ **5.47.18** ॥

कपिस्ततस्तं रणचण्डविक्रमं
    प्रवृद्धतेजोबलवीर्यसायकम्।
कुमारमक्षं प्रसमीक्ष्य संयुगे
    ननाद हर्षाद् घनतुल्यनिःस्वनः॥ **5.47.19** ॥

स बालभावाद् युधि वीर्यदर्पितः
    प्रवृद्धमन्युः क्षतजोपमेक्षणः।
समाससादाप्रतिमं रणे कपिं
    गजो महाकूपमिवावृतं तृणैः॥ **5.47.20** ॥

स तेन बाणैः प्रसभं निपातितै -
    श्चकार नादं घननादनिःस्वनः।
समुत्सहेनाशु नभः समारुजन्
    भुजोरुविक्षेपणघोरदर्शनः॥ **5.47.21** ॥

तमुत्पतन्तं समभिद्रवद् बली
    स राक्षसानां प्रवरः प्रतापवान्।
रथी रथश्रेष्ठतरः किरञ्छरैः
    पयोधरः शैलमिवाश्मवृष्टिभिः॥ **5.47.22** ॥

स ताञ्छरांस्तस्य हरिर्विमोक्षयं -
श्चचार वीरः पथि वायुसेविते।
शरान्तरे मारुतवद् विनिष्पतन्
मनोजवः संयति भीमविक्रमः ॥ **5.47.23** ॥

तमात्तबाणासनमाहवोन्मुखं
खमास्तृणन्तं विविधैः शरोत्तमैः।
अवैक्षताक्षं बहुमानचक्षुषा
जगाम चिन्तां स च मारुतात्मजः ॥ **5.47.24** ॥

ततः शरैर्भिन्नभुजान्तरः कपिः
कुमारवर्येण महात्मना नदन्।
महाभुजः कर्मविशेषतत्त्वविद्
विचिन्तयामास रणे पराक्रमम् ॥ **5.47.25** ॥

अबालवद् बालदिवाकरप्रभः
करोत्ययं कर्म महन्महाबलः।
न चास्य सर्वाहवकर्मशालिनः
प्रमापणे मे मतिरत्र जायते ॥ **5.47.26** ॥

अयं महात्मा च महांश्च वीर्यतः
समाहितश्चातिसहश्च संयुगे।
असंशयं कर्मगुणोदयादयं
सनागयक्षैर्मुनिभिश्च पूजितः ॥ **5.47.27** ॥

पराक्रमोत्साहविवृद्धमानसः
समीक्षते मां प्रमुखोऽग्रतः स्थितः।
पराक्रमो ह्यस्य मनांसि कम्पयेत्
सुरासुराणामपि शीघ्रकारिणः ॥ **5.47.28** ॥

न खल्वयं नाभिभवेदुपेक्षितः
पराक्रमो ह्यस्य रणे विवर्धते।
प्रमापणं ह्यस्य ममाद्य रोचते
न वर्धमानोऽग्निरुपेक्षितुं क्षमः॥ **5.47.29** ॥

इति प्रवेगं तु परस्य तर्कयन्
स्वकर्मयोगं च विधाय वीर्यवान्।
चकार वेगं तु महाबलस्तदा
मतिं च चक्रेऽस्य वधे महाकपिः॥ **5.47.30** ॥

स तस्य तानष्ट वरान् महाहयान्
समाहितान् भारसहान् विवर्तने।
जघान वीरः पथि वायुसेविते
तलप्रहारैः पवनात्मजः कपिः॥ **5.47.31** ॥

ततस्तलेनाभिहतो महारथः
स तस्य पिङ्गाधिपमन्त्रिनिर्जितः।
स भग्ननीडः परिवृत्तकूबरः
पपात भूमौ हतवाजिरम्बरात्॥ **5.47.32** ॥

स तं परित्यज्य महारथो रथं
सकार्मुकः खड्गधरः खमुत्पतन्।
ततोऽभियोगादृषिरुग्रवीर्यवान्
विहाय देहं मरुतामिवालयम्॥ **5.47.33** ॥

कपिस्ततस्तं विचरन्तमम्बरे
पतत्त्रिराजानिलसिद्धसेविते।
समेत्य तं मारुतवेगविक्रमः
क्रमेण जग्राह स पादयोर्दृढम्॥ **5.47.34** ॥

स तं समाविध्य सहस्रशः कपि -
मर्होरगं गृह्य इवाण्डजेश्वरः।
मुमोच वेगात् पितृतुल्यविक्रमो
महीतले संयति वानरोत्तमः॥ **5.47.35**॥

स भग्नबाहूरुकटीपयोधरः
क्षरन्नसृङ्निर्मथितास्थिलोचनः।
सम्भिन्नसन्धिः प्रविकीर्णबन्धनो
हतः क्षितौ वायुसुतेन राक्षसः॥ **5.47.36**॥

महाकपिर्भूमितले निपीड्य तं
चकार रक्षोऽधिपतेर्महद्भयम्।
महर्षिभिश्चक्रचरैः समागतैः
समेत्य भूतैश्च सयक्षपन्नगैः।
सुरैश्च सेन्द्रैर्भृशजातविस्मयै -
र्हते कुमारे स कपिर्निरीक्षितः॥ **5.47.37**॥

निहत्य तं वज्रिसुतोपमं रणे
कुमारमक्षं क्षतजोपमेक्षणम्।
तदेव वीरोऽभिजगाम तोरणं
कृतक्षणः काल इव प्रजाक्षये॥ **5.47.38**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तचत्वारिंशः सर्गः॥